This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M665 विषय पूजाविधी.
नाव. आश्लेषाबलि.
लेखक/लिपीकार — MSS.
पृष्ठ 4 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ आश्लेषाशांतिः॥ आचम्यप्राणायामः देशकालौसंकीर्त्यअस्य
बालकस्यआश्लेषाजननसूचितपित्रादिसर्वारिष्टपरिहारद्वारास्त्री
परमेश्वरप्रीत्यर्थंआश्लेषाजननशांतिंकरिष्ये॥तदंगतयागणपति
पूजनपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यवरणानि
करिष्ये॥नांदीश्राद्धानिकुर्यात्॥आचार्यःदिग्बंधनंकृत्वापंच
गव्यकरणंप्रोक्षणं॥ईशान्येपंचवर्णैःस्वस्तिकंविरच्यतत्रप्रीहि
यवःधान्यंवाकलशंसंस्थाप्ययथोक्तविधिनापूजयित्वासौवर्णी
मुद्रांतिमांसंस्थाप्ययथोक्तविधिनाप्राणप्रतिष्ठांषोडशोपचारैःपू
जयेत्॥ऋत्विजोदुष्टसूक्तअथनामहिम्नःपाठःकृत्वापुनःकुंभः
स्थापनंमध्येचतुर्दिक्षुचतुरःकलशान्स्थापयित्वापूर्णपात्रंनि
धायसेवंगुणंउपाहृत्यसंपूजयेत्॥तत्रकुंभेदेवदारुरक्तचंदनकम
लनीलोत्पलकुष्ठप्रियंगुशुंठीमुस्थाआमलकत्वचसर्वपतगरअगरमुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ सत्रं [illegible]वृद्धि उडी दग्निक्षिपेत्।।दक्षिण कुंभे पंचामृत गजमद तीर्थोदक २
सप्तधान्य सुवर्णादि निक्षिपेत्।।पश्चिम कुंभे गज ३ अश्व वाल्मीक हो लखातमृति
का राज द्वार रथशाला गोशाला चतुष्पथमृतिका क्षिपेत्।। उत्तर कुंभे मुक्ता
प्रवाल माणिक्य वज्रेन्द्र नीलोत्पल पंचरत्नानि वटाश्वत्थ पलाश प्लक्ष औ
दुंबर पल्लवान जंबू कदंब निंबार्चिंचिणी वटोदुंबर प्लक्षाम्र मूलत्वचा
सर्वकूपजलानि-चनिःक्षिपेत्।। मध्यगते रात छिद्रकुंभे रातौषध्यः
स तदभावे यथालाभ सवृक्षाणां पल्लवानि विष्णुक्रांता सहदेवी तुलसी
रातावरी कुशकुंकुमानि-च प्रक्षिपेत्।। ततो मध्य कुंभोपरि वस्त्रंप्र
सार्य अक्षदलं कृत्वा तत्र स्वर्णमयीं सर्प प्रतिमां आश्लेषाधिदैवतां
अग्न्युतारण पूर्वकं पंचामृत स्नापितां मूलमंत्रेण स्थापयेत्।।स
पेरिक्त स्निग्धश्च द्विभुजः पंचवर्णकः।। फलकासि सिध्वर स्तीक्ष्णो
दिव्याभरण भूषितः।।इति संपंथ्यात्वा सर्प इह आगच्छ इह तिष्ठ इति
सर्पदेवताया प्रथमादि विधु नागाष्टक पूजा येत् ॐ अनंताय नमः
१ वासुकये नमः २ तक्षकाय नमः ३ कर्कोटकाय नमः ४ पद्माय
नमः ५ शंखाय नमः ६ कुलिकाय नमः ७ महापद्माय नमः ८
आवाहयेत्।।ततः तद्दक्षिणे स्वर्ण प्रतिमायां पुण्य देवतायां बृहस्पति ३)
उत्तरश्च अन्यप्रतिमायां मघादेवताः पितृश्चावाहयेत्।।बृहस्प
तिं आवाहयेत्१।। पितर इह आगच्छ २ प्रागादि चतुर्विंशति पंकज
दलेषु पूर्वं आरभ्य पुनर्वसु पर्यन्तं नक्षत्राणि तत देवता आवाहयेत्
।। भग इह आगच्छ इहतिष्ठ १ अर्जमन २ सवितरि ३ त्वष्टृ ४ वायो ५
इन्द्राग्नी ६ मित्र ७ [redacted] इन्द्र ८ निर्ऋते ९ आप १० विश्वे
देवा ११ विष्णो १२ वसव १३ वरुण १४ अजैकपाद १५ अहिबु
ध्न्य १६ पूषन १७ अश्विनौ १८ यम १९ अग्नि २० प्रजापति
२१ सोम २२ रुद्र २३ अदिति २४ इत्यावाह्य इन्द्र १ अग्नि २
यम ३ निर्ऋति ४ वरुण ५ वायु ६ कुबेर ७ ईशान ८ इतिलोकपालान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आवाह्य प्रतिष्ठाप्यसपेक्ष्यो नमः ।। आश्लेषायै नमः ।। बृहस्पतये
नमः ।। पितृभ्यो नमः ।। भगाद्यावाहित देवताभ्यो नमः ।। लोकपा
लेभ्यो नमः इति षोडशोपचारैः संपूजयेत ।। अत्रप्राक कुंभे आयुः इ
ति जपेत ।। दक्षिण कुंभे इतिसूक्तं उत्तर कुंभे रक्षोघ्नं जपेत ।। मध्य कुं
भे बकं इति अक्षोत्तर शतं जपेत ।। पावमान सूक्तं जपेत ।। आचार्यः
उदक कुंभं नैर्ऋत्ये स्थंडिले अग्निं प्रतिष्ठाप्य ईशान्यां ग्रह स्थापनं ।।
अधिप्रत्यधिपंचलोकपाल दशदिग्पाल स्थापनं संपूजयेत तदुदक
कलश स्थापनं पूजयेत ।। कुशकंडिकां कृत्वा क्रमेण पायस कृसर चरु
आघार आज्य भागांतेसूर्यादि नवग्रह समिध चरु तिलाज्य द्रव्यैः
अष्ट अष्ट संख्यया जुहुयात ।। एवंग्रह होमं कृत्वा प्रधान देवता सर्वे
भ्यः अक्षोत्तर शत संख्यया जुहुयात ।। बृहस्पतये पितृभ्यश्च अक्षो
विंशति संख्यया दद्यात ।। अष्ट अष्ट पायस पायसा हुतिभिः भगादिचतु-

विंशति देवताभ्यः लोकपालेभ्यश्च जुहुयात ।। ओंभगायस्वाहा इदं ।१
अर्यम्णे स्वाहा इदं २ सवित्रेस्वाहा इदं ३ त्वष्ट्रे स्वाहा इदं ३ वायवेस्वा
हा इदं ४ इन्द्राग्निभ्यांस्वाहा इदं ५ मित्रायस्वाहा इदं ६ इन्द्रायस्वाहा
इदं ७ निर्ऋतयेस्वाहा इदं ८ अद्भ्यः स्वाहा इदं ९ विश्वेभ्यो देवेभ्यः स्वा
हा इदं १० विष्णवेस्वाहा इदं ११ वसुभ्यः स्वाहा इदं १२ वरुणायस्वाहा इ
दं वरुणाय १३ अजैकपदे स्वाहा इदं १४ अहिर्बुध्न्यायस्वाहा इदं १५
पूष्णे स्वाहा इदं १६ अश्विभ्यांस्वाहा इदं १७ यमायस्वाहा इदं १८
अग्नयेस्वाहा इदं १९ प्रजापतयेस्वाहा इदंप्रजापतये २० सोमाय स्वा
हा इदं २१ रुद्रायस्वाहा इदं २२ अदितयेस्वाहा इदं २३ इन्द्रायस्वाहा
इदं २४ अग्नयेस्वाहा इदं २५ यमायस्वाहा इदं २६ निर्ऋतयेस्वाहा इदं
२७ वरुणायस्वाहा इदं २८ वायवेस्वाहा इदं २९ कुबेरायस्वाहा इदं ३०
इशानायस्वाहा इदं ३१ होमंकृत्वा मूलशांतिवत सर्वहोमंकृत्वा हिरण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्णइति श्रीसूक्तस्य हवनं कृत्वास्विकृतादि नवाहुतीहोमः।। पूजा
स्विष्टंनवाहुत्या इति क्रमेण सर्वकार्यंबलिः - पूर्णाहुतिः श्रेयस्संपात्यदानं
अभिषेक सर्वं पूर्ववत कृत्वा।। पुनः तेभ्योनमः स्वर्पति - अश्लेषायै
नमः - आश्लेषां।। बृहस्पतयेनमः - बृहस्पतिं - पितृभ्यो नमः।। भगा
दावहित देवताभ्यो नमः इति भगादीन्।। लोकपालेभ्योनमः।।
ओडशोपचारैः संपूजयेत्। अग्नेयकुंभे आयुः त्रिरायुषं इ-
त्यादि - दक्षिणकुंभे त्वमग्ने इत्यादि त्यादिसूक्त - उत्तरकुंभे रक्षो
हणं इति ऋचंजपेत - मध्यमेकुंभे त्र्यंबकं त्र्यंबकं इतिऋगुत्तर
रालं पावनंसूक्तं च सकृज्जपेत्।। ततः आचार्यः उद्वुध्यस्वेति
अग्नेये स्थंडिले अग्निंप्रतिष्ठाप्यतदीशान्यांनवग्रहस्थापन
अधिप्रत्याधिस्थापन पंचलोकदिग्दिग पाल उद्कलशस्था
पयेत्।। देवताभिध्यानंकरोंकृत्वा समित्कुस
दन्नंचरुंचघृतेनजुहुयात्।। द्वौ द्वौआहुतिं जुहुयात्।।
प्रधानहोमंकृत्वा शेषंप्रकल्पयेत्।।

योसौवज्रधरोदेवोमहेन्द्रोगजवाहनः।। सार्पजातंशिशोर्दोषंभा ता
पित्रोर्व्यपोहतु।।१।। योसौशक्तिधरोदेवोहुतभुङमेषवाहनः।। सप्तजि
ह्वश्चदेवोग्निः सार्पदोषंव्यपोहतु।।२।। योऽसौदंडधरोदेवोधर्मोमहिष
वाहनः।। सार्पजातंशिशोर्दोषंक्षयंपोहतुयत्नतः।।३।। योऽसौखड्गधरो
देवोनिर्ऋतीराक्षसाधिपः।। प्रशामयतु सार्पंत्वंदोषंगंडांतसंभवं।।४।।
योऽसौपाशधरोदेवोवरुणश्चजलेश्वरः।। नक्रवाहः प्रचेतानोसार्पंदोषं
व्यपोहतु।।५।। योऽसौदेवोजगत्प्राणोमातुलोमृगवाहनः।। प्रशा
मयतुसार्पंत्वंदोषंबालस्यशांतये।।६।। योऽसौनिधिपतिर्देवःपि
नाकीवृषवाहनः।। आश्लेषामूलगंडानादोषमाशुव्यपोहतु।।७।।
योऽसौनिधिपतिर्देवःखड्गभृद्वाजिवाहनः।। मातापित्रोःशिशो
श्चैवसापसार्पंदोषंव्यपोहतु।।८।। विघ्नेशःक्षत्रपोदुर्गालोकपाला
नवग्रहाः।। सर्पदोषप्रशमनंसर्वेकुर्वन्तुशांतिदाः।।९।। आश्लेषाऋ
क्षजातस्यमातापित्रोर्धनस्यच।। भ्रातृज्ञातिकुलस्थानांदोषंसर्वंम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योहद्धुं ॐ ॥ ॥ योऽसौवागीश्वरो नामसधिदेवोबृहस्पतिः ॥ मातापि
ओः शिरोश्चैवगंडातंसंस्पोहतु ॥ ११ ॥ पितरः सर्वभूतानांरक्षंतुपि
तरः सदा ॥ सर्पनक्षत्र जातस्यवित्र्यश्चातिबांधवान ॥ १२ ॥ ततः
सुरास्त्वामभिषिंचंतु इतिअभिषिच्यसर्वफलपोदकेनरातश्छिद्रं
तथीयोंअभिशोकः यजमानोपरिसर्वकुटुबानांकृत्वाआचार्यायधे
नुंब्रम्हणवृशाभंवृद्धजापिनेकृष्णमनडवाहंवृद्धप्रतिमांदत्वाअविघ्ने
यथाशक्तिदक्षिणांदद्यात ॥ सर्वप्रधानदेवतानांउतरपूजनंविधाय
तामपात्रे फलपुष्पादि युक्तं अर्घ्यं गृहीत्वा ओंसपाद्योत्तमस्तुभ्यं
नागानांचगणाधिप ॥ गृहाणार्घ्यं मयादत्तं सर्वारिष्टप्रशांतये
॥ इतिअर्घ्यं दत्वाउत्तिष्ठब्रम्हणस्तेयांतुदेवेतिविसर्जयेत्यस्यसमृ
द्धेति ब्रम्हणभोजनभूयसींदत्वाकर्मसमापयेत ॥ द्वादशवारावा
प्यनुस्मरणंकृत्वा विप्राशिशाग्रहीत्वा कर्मसमापयेत ॥ इति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 16:00
,TRANSFERRED=2019/09/16 at 16:02:07
,PAGES=6
,TYPE=STD
,NAME=S0001849
,Book Name=M-665-AASHLESHASHANTI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection